9

आम्लं द्राक्षाफलम्



एकः शृगालः ।

एकः शृगालः वनं गच्छति ।

सः वनं गच्छति ।

पिपासा तस्य बुभुक्षा

पिपासया बुभुक्षया वनं गच्छति ।

सः वनं गच्छति ।

किं च करोति सः किं च करोति ?

वामतः पश्यति दक्षिणतः पश्यति

अग्रतः पश्यति पृष्ठतः पश्यति

स्वेदः जायते तृषा जायते ।



इतः गच्छति

किमपि न लभते ।

ततः गच्छति

किमपि न लभते ।

श्रान्तः जायते खिन्नः जायते ।

किं च पश्यति सः किं च पश्यति ?

पश्यति द्राक्षालताम्

सः पश्यति द्राक्षाफलम् ।

उपरि उपरि लतासु

दृश्यते च तत् फलम् ।

अनुक्षणं तन्मुखे रसः जायते ।

किं च करोति सः किं च करोति ?

एकवारम् उत्पतति, द्विवारम् उत्पतति,

त्रिवारम् उत्पतति, पुनः पुनः उत्पतति ।

स्वेदः जायते श्रमः जायते

लभते न द्राक्षाफलम् ।



किं च कथयति सः किं च कथयति ?

“आम्लं द्राक्षाफलम् !”

इत्येवं कथयति पलायते

इत्येवं कथयति पलायते ।

टिप्पण

पिपासा તરસ **बुभुक्षा** ભૂખ **इतः ततः** આમતેમ **श्रान्तः** થાકેલો **दक्षिणतः** જમણી બાજુ **वामतः** ડાબી બાજુ **अग्रतः** આગળ **पृष्ठतः** પાછળ **स्वेदः** પરસેવો **तृषा** તરસ **उत्पतति** કૂદે છે. **अनुक्षणम्** તરત જ, બીજી જ ક્ષણે **इत्येवं** આમ કહીને **तन्मुखे** - તેના મુખમાં

विशेषः

इत्येवं - इति एवम्

किमपि - किम् अपि

स्वाध्यायः

1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો:

शृगालः, बुभुक्षया, पिपासया, श्रान्तः, खिन्नः, दक्षिणतः, स्वेदः
द्राक्षालताम्, दृश्यते, अनुक्षणम्, तन्मुखे, उत्पतति, द्विवारम्, आम्लम्

2. નીચે આપેલા પ્રશ્નોના જવાબ માટે આપેલા વિકલ્પોમાંથી સાચો વિકલ્પ શોધી તેની સામે ખરાની નિશાની કરો:

(१) शृगालः कुत्र गच्छति ?

शृगालः ग्रामं गच्छति । ☐

शृगालः नगरं गच्छति । ☐

शृगालः वनं गच्छति । ☐

(२) शृगालः किं पश्यति ?

शृगालः द्राक्षाफलं पश्यति । ☐

शृगालः आम्रफलं पश्यति । ☐

शृगालः जम्बूफलं पश्यति । ☐

(३) द्राक्षाफलं दृष्टवा शृगालः किं करोति ?

शृगालः उपविशति । ☐

शृगालः उत्पतति । ☐

शृगालः तिष्ठति । ☐

3. નીચેની કાવ્યપંક્તિઓ પૂર્ણ કરો.

(१) एकः शृगालः ..... खिन्नः जायते ।

(२) किं च पश्यति सः ..... रसः जायते ।

4. આ કાવ્યનું અભિનય સહ ગાન કરો.

5. ચિંતન કરો અને ખાલી જગ્યા પૂરો.

(१) रामः सीतायाः वामतः अस्ति । सीता रामस्य ..... अस्ति ।

(२) विनयः कृष्णस्य ..... अस्ति । कृष्णः विनयस्य दक्षिणतः अस्ति ।

(३) वीणायाः अग्रतः शीला अस्ति । शीलायाः ..... वीणा अस्ति ।

(४) सुधा झरणायाः ..... अस्ति । झरणा सुधायाः पृष्ठतः अस्ति ।

6. તમારાથી अग्रतः, पृष्ठतः, दक्षिणतः અને वामतः કોણ બેસે છે તે સમજીને વાક્યો લખો. જેમ કે, मम दक्षिणतः सुरेशः उपविशति ।

ज्ञातव्यम्

- कार्यालयः — કાર્યાલય
- वित्तकोषः — બૅન્ક
- उच्चविद्यालयः — હાઇસ્કૂલ
- महाविद्यालयः — કૉલેજ
- चिकित्सालयः — દવાખાનું
- यन्त्रागारः — કારખાનું